# विवेकभास्करः

## संस्कृतविभागीयभित्तिपत्रिका

रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानम्, वेलुड़्मठ

उद्घाटकः -स्वामी सर्वोत्तमानन्दः

निर्देशकः - डः श्रीवेङ्कटरमणभट्टः, सहायकाध्यापकः संस्कृताध्ययनविभागस्य

सम्पादकः - श्रीकृष्णपदरुइदासः, स्नातकोत्तरद्वितीयवर्षीयः

आलङ्कारिकः - श्रीशुभदीपपालः, स्नातकोत्तरद्वितीयवर्षीयः

विषयः - गदाधरभट्टाचार्यचक्रवर्त्ती, वर्षम् - ०५

प्रकाशनदिनाङ्कः - ११/१०/२०१८, वासरः - गुरुवासरः

शूचीपत्रम्

॥सम्पादकीयम्...........................................................................................................3
॥भट्टाचार्यचक्रवर्त्तिजीवनचरितम्॥ - नयनचौधुरी, स्नातकद्वितीयवर्षीयः...............................4
॥गदाधरकृतयः॥ - शुभदीपदासः, स्नातकतृतीयवर्षीयः..................................................6
॥गदाधरीयप्रतिभा तद्वंशीयपण्डिताश्च॥ - तुहिनमण्डलः, स्नातकोत्तरचतुर्थवर्षीयः..................7

# सम्पादकीयम्

नवद्वीपे चैतन्यदेवरघुनाथशिरोमण्यादयः नैके नैयायिकाः जन्म लब्धवन्तः। अतः न्यायभूमिर्नवद्वीपनगरी इत्युक्तिरत्युक्तिर्न भवतीति मन्ये। न्यायस्य बहुषु सम्प्रदायेष्वन्यतमस्य दीधितिसम्प्रदायस्य चरमग्रन्थकारः गदाधरोऽपि अत्रैवाजायत। तस्य जन्मकालस्तावत् एकादशाधिकसहस्रतमेशवीयाब्द इति विद्वद्भिरनुमन्यते। तस्य पिता कश्चन जीवु-आचार्यनामकः महान् तान्त्रिकः वामाचारी आसीदिति श्रूयते। स्वाध्यायानन्तरमेव सः भट्टाचार्यचक्रवर्त्ती इत्युपाधिम् अवाप। तस्य गुरुः हरिरामतर्कवागीशः तत्काले सर्वप्रधानः न्यायपण्डित आसीदित्यपि तल्लेखनेन ज्ञायते। गदाधरः न्यायाकाशे नैकानि नक्षत्राणि समायोजितवान्। तत्रापि अनुमानदीधितेः सर्वापेक्षया विस्तीर्णां टीकां विरच्य जगत्प्रसिद्धिं जगाम। महानैयायिकोऽयं पञ्चदशोत्तरैकशता-धिकसहस्रतमेशवीयाब्दे धरणीमिमां त्यक्तवान्।

**“गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।**

**उत्थाप्य सानुकम्पं हि समादधति सज्जनाः॥”**

इत्युक्तममुं न्यायमनुस्मृत्य तर्कवागीशः गदाधरभट्टाचार्यचक्रवर्त्ती इत्येनमाधारीकृत्य विहितोऽयं क्षुद्रप्रयासः भवतां ज्ञानायानन्दाय च भवेदित्याशास्महे।

सम्पादकः

# ॥भट्टाचार्यचक्रवर्त्तिजीवनचरितम्॥

- नयनचौधुरी, स्नातकद्वितीयवर्षीयः

"वाग्देवीवदनादनादिरचनाविन्यासदीव्यन्नव-
द्वीपप्राप्तजनेरनेकदिवसं वाराणसीवासिनः।
विद्यासागरजागरोन्नतमतेर्भाव्या ममैषा कृति-
र्विद्वद्भिः कृपया कयापि सहसा मात्सर्यमुत्सृज्य तैः॥" इति।

सरस्वत्या रचनायां नवद्वीपनगरी शास्त्रचर्चायां देदीप्यमाना आसीदिति तत्र जन्म लब्धवतः स्वात्मानं धन्यम्मन्यमानिनः माधवचम्पूरचयितुः चिरञ्जीवस्य वचनमिदम्। अतः नवद्वीपे शास्त्राध्ययनमध्यापनञ्च आवहकालात्प्रचलदस्तीति ज्ञायते। तत्रापि नव्यन्यायचर्चायां प्रसारे च नवद्वीपः वङ्गेष्वन्यतमं भागमभजत। वाराणसी तस्यैव शाखाकेन्द्रम् आसीदित्यप्यस्ति प्रवादः। तस्मादुच्यते नवद्वीपं विहाय केवलं काशीधाम एव न्यायचर्चाक्षेत्रम्। न्यायस्य च बहवः सम्प्रदायाः समुपलभ्यन्ते स्म। तत्रैव दीधितिसम्प्रदायोऽप्यन्यतमः। तस्य सम्प्रदायस्य चरमग्रन्थकारः गदाधरः इत्यत्र नास्ति सन्देहः। स गदाधरः न्यायस्य कठिनतमग्रन्थस्य अनुमानदीधितेः सर्वापेक्षां विस्तीर्णां टीकामरीरचत्। यतो हि अनुगदाधरमेक एव नवद्वीपवासी नैयायिकः रुद्रतर्कवागीशः तस्याः टीकालेखने स्वमतिं साहसं चाप्रदर्शयत्। अयमेव गदाधरः नव्यन्यायस्य तृतीययुगावसानकारी-त्युक्तिरत्युक्तिर्न भवति। तस्य असीमप्रतिभासमन्विताः टीकाग्रन्थाः अधुना यथायथं नोपलभ्यन्ते। क्वचित्क्वचित्खण्डरूपेण दरीदृश्यन्ते।

अयं गदाधरो न्यायाकाशे सूर्य इव प्रकाशमानः अस्ति। एतस्य जन्मकालो महाविवादास्पदम् वर्तते। बहुषु मतेषु एकादशाधिक सहस्रतमे ईशवीयाब्देऽयं जन्मालभत इति कृष्णकान्तविद्यालङ्कारमतमेवाङ्गीक्रियते। तस्य पितुर्नाम जीवु-आचार्यः। सोऽप्याचार्यः महान् वामाचारी आसीदित्यपि श्रूयते।

महानैयायिकोऽयं नैकाः टीकाः व्यरचयद्या अधुना अनुपलब्धाः। तासु तत्त्वचिन्तामणिटीका, अनुमानदीधितिटीका च तस्य ख्यातिमवर्धयत। स्वपाठं समाप्यैव सः भट्टाचार्यचक्रवर्त्ती इत्युपाधिं लेभे। गदाधरः स्वविरचितकाव्यप्रकाशटीकायाः प्रथमोल्लासान्ते स्वोपाधिमलिखत्। तद्यथा-

**“भट्टाचार्यचक्रवर्ती गदाधर उदारधीः।**

**व्याकार्षीत्प्रथमोल्लासमुल्लासाय सुमेधसाम्॥”इति।**

एतादृशस्य नैयायिकस्य गुरुरपि तथाप्रतिभावान् स्यादेवेत्यत्र नास्ति सन्देहः। हरिरामः तत्काले न्यायस्य सर्वप्रधानः पण्डितः आसीदिति गदाधरस्य रचानाया एव ज्ञायते -

**“निजगुरुहरिनामनामभूमीसमुदितभास्करवाङ्मयूखयोगात्।**

**स्फुरदमलचिदर्कान्तरत्नश्चरममणिं विवरीतुमुद्यतोऽस्मि॥” इति।**

हरिरामः जगद्गुरुः इत्याख्यया अपि विभूषितः। तद्विरचितेषु वादग्रन्थेषु एकस्य पुष्पिका ईदृशी आसीत् -“इति हरिरामतर्कवागीश-महामहोपाध्याय जगद्गुरु विरचित प्रामाण्यवादस्वप्र-काशरहस्यं सम्पूर्णम्” इति।

अयं महान्नैयायिकः कदा दिवं प्राप्तवान्नित्येतस्मिन् विषये महान् विवादो वर्तते। तेषु राजेन्द्रनाथमतमेव गृह्यते विद्वद्भिः। तन्मते तु गदाधरः पञ्चदशैकशततमाधिकसहस्रतमे ईशवीयाब्दे धरिणीमिमां त्यक्तवान्निति।

## ॥गदाधरकृतयः॥

- शुभदीपदासः, स्नातकतृतीयवर्षीयः

**“भेदकोऽज्ञानदुर्गस्य शास्त्रशस्त्रसमन्वितः।**
**गङ्गाधरमहाभक्तो मेधाधरगदाधरः॥”**

अशेषविशेषभारतीयदर्शनब्रह्माण्डस्य नव्यन्यायाकाशे मध्याह्नमार्तण्ड इव देदीप्यमानो वङ्गीयो नवद्वीपवासी तन्त्रनिष्ठो गदाधरभट्टाचार्यः। अनुमानदीधितेः सर्वविस्तृतायाष्टीकाया रचयिता अयं गदाधरो दीधितिसम्प्रदायस्य चरमो ग्रन्थकार इति वचनं सत्यादनपेतम्। तृतीययुगीयनव्यन्यायमहापोतस्य अन्तिमः कर्णधारो हरिरामशिष्योऽयं गदाधरः। यथा दिवसे दिवाकरस्य प्रचण्डप्रतापेन नक्षत्राणि क्षीणप्रभाणि भवन्ति तथा गदाधरस्यासीमप्रतिभया असिद्धप्रायाः सञ्जाता दीधितिग्रन्थस्य जगदीशतर्कालङ्कारभवानन्दादिविरचिताः प्राक्तनाः टीकाग्रन्थाः।

गदाधरस्य कृतिविषये विदुषां परिषदि महान् विवादो वर्तते। तथापि आपातनिश्चिताः तदीयग्रन्थत्वेन प्रसिद्धा अत्र समुल्लिख्यन्ते - १) तत्त्वचिन्तामणेः टीका, २) अनुमानखण्डस्य टीका, ३) शब्दमण्यालोक-टीका, ४) अनुमानालोकटीका, ५) प्रत्यक्षदीधितिटीका, ६) अनुमान-दीधितिटीका, ७) नञ्वादव्याख्या, ८) बौद्धाधिकारदीधितिटीका, ९) कुसुमाञ्जलिटीका १०) प्रत्यक्षालोकटीका च। एतासु अनुमानदीधितिः मणिमालायां मध्यमणिरिव गदाधरस्य सर्वोत्तमा सृष्टिर्या भारतस्य सर्वत्र सर्वजनविदिता। अस्यामेव हेत्वाभाससामान्यनिरुक्त्यादिप्रकरणेषु तदीयमपूर्वं प्रतिभाकौशलम् अद्यावधि न्यायविद्यार्थिनो विस्मितीकरोति। विहायैतत्सर्वं ग्रन्थराशिं वादग्रन्था अपि गदाधरस्य बहवः प्रसिद्धाः। ते च – १) शक्तिवादः, २) मुक्तिवादः, ३) व्युत्पत्तिवादः, ४) विषयतावादः, ५) विधिस्वरूपः इत्यादयः। नव्यन्यायातिरिक्तविषयेऽपि तेन ग्रन्थद्वयं विरचितम् -

१) ऋग्वेदोक्तदशकर्मपद्धतिः - गदाधरस्य कुलमृग्वेदि। तस्य वेदस्य भिन्ना पद्धतिस्तेन प्रणीता।

२) काव्यप्रकाशटीका - काव्यप्रकाशस्य चतुर्थोल्लासपर्यन्तमियं टीका उपलभ्यते। अस्य ग्रन्थस्य तृतीयोल्लासे प्रतिभाशब्दव्याख्यानावसरे गदाधरेण सकौतुकी उक्तिः कृता - “यस्यैव परिणामभेदो वासनेत्युच्यते, यच्चान्यानां शुद्धतार्किकवैयाकरणादीनां न व्यङ्ग्यार्थबोधो न वा शृङ्गारादिरसास्वादः।” तथा चोक्तम् -

**“सवासनानां नाट्यादौ रसस्यानुभवो भवेत्।**
**निर्वासनास्तु रङ्गान्तर्वेश्मकृत्याश्मसन्निभाः॥” इति।**

दुर्धर्षतार्किकप्रकाण्डस्यैतादृशं वचनं विस्मयावहं मन्यते। किन्तु तार्किकत्वालङ्कारिकत्वयोः समन्वयो वङ्गदेशे चिरात् प्रचलितः। किञ्च, गदाधरस्यान्तःस्थलं कर्कशतर्कजालावृतमपि सरसमासीदिति जघन्ये पङ्कराशौ रमणीयपङ्कजोत्पत्तिरिव आश्चर्यम्।

तर्काचार्योपाधिविशिष्टेन गदाधरेण रचिता एका चण्डीटीका प्राप्यते। केचन अनेन गदाधरेण सह प्रकृतस्य गदाधरभट्टाचार्यस्य अभेदं कल्पयन्ति। किन्तु इदं न सम्भवति -

१) चण्ड्याः अन्यवङ्गीयकृतटीकापेक्षया गदाधरटीका अत्यन्तम् अनुत्कृष्टा।

२) गदाधरभट्टाचार्यस्य तर्काचार्योपाधिः सम्पूर्णतया अज्ञातः।

## ॥गदाधरीयप्रतिभा तद्वंशीयपण्डिताश्च॥

**- तुहिनमण्डलः, स्नातकोत्तरचतुर्थवर्षीयः**

गदाधरस्य पिता जीवु-आचार्यः आसीदेकः वामाचारी तान्त्रिकः। गदाधरश्चासीद् एकः सिद्धपुरुषः। तस्य मन्त्रसिद्धत्वं वंशानुक्रमेण गदाधरस्य ज्येष्ठपुत्रे रामतर्कालङ्कारे अपि आगतम्। किञ्च एकदा गदाधरः भविष्यद्वाणीं कृतवान् यत् नवद्वीपे न्यायशास्त्रे पाण्डित्यं सप्तपुरुषं यावत् पुरुषात् पुरुषान्तरं प्रवहिष्यति इत्येतदपि रूढिः आसीत्। अतः दृश्यते यत् गदाधरस्य वंशे वंशानुक्रमेण न्यायपरम्परा प्रचलिता आसीत्। तस्य जीवत्काले चत्वारिंशदुत्तरषोडशशततमेशवीयाब्दतः षष्ट्युत्तरषोडशशततम-ईशवीयाब्दाभ्यन्तरे गदाधरः बहून् ग्रन्थान् रचितवान्।गदाधरस्य कुलपञ्ज्यनुसारं तस्य पञ्च पुत्राः आसन् इति ज्ञायते। ते च यथाक्रमं राम-तर्कालङ्कारः, कृष्णदेव-विद्याभूषणः, रामदेव-तर्कवागीशः, महादेवः, रघुदेव-तर्कवागीशः च।

१)राम-तर्कालङ्कारः - अयमासीत् गदाधरस्य ज्येष्ठपुत्रः। अस्यां धारायां न्यायचर्चा सम्यक् प्रचलिता। राम-तर्कालङ्कारस्य पुत्रः आसीत् रघुनाथ-वाचस्पतिः। तस्य पुत्रौ गोविन्द-न्यायपञ्चाननः, रामकान्त-विद्यालङ्कारश्च। गोविन्दः एकदा कञ्चित् दिग्विजयिनं पण्डितं तर्केण पराजितवान्। ततः शापवशात् तस्य वंशः पण्डितविहीनः सञ्जातः।

२)कृष्णदेव-विद्याभूषणः - गदाधरस्य द्वितीयः पुत्रोयम् अपुत्रकः सन् स्वज्येष्ठभ्रातुः रामस्य पुत्रं हरदेव-तर्कसिद्धान्तं स्वपुत्ररूपेण पोषयामास। हरदेवस्य च पञ्च पुत्राः आसन्। ते च यथाक्रमं तितुराम-तर्कपञ्चाननः, कृपाराम-तर्कभूषणः, श्याम-सार्वभौमः, गोकुल-विद्यावागीशः, कृष्णकान्त-विद्यालङ्कारश्च। एतेषु तितुरामः कृष्णकान्तश्च शीर्षस्थानीयौ नैयायिकौ आस्ताम्। कृष्णकान्तस्य पाण्डित्यविषये मधुसूदननामा कश्चित् विद्वान् लिखितवान् यत् “कृष्णकान्तौ महानेव शङ्करप्रतियोगिकः” इति। कृष्णकान्तः स्वकीयैकस्यां पाठशालायाम् अध्यापनमपि करोति स्म। काशीनाथ-तर्कचूडामणेः मृत्योः परं कृष्णकान्तः नवद्वीपे प्रधान-नैयायिक इति पदम् अलङ्कृतवान्। तस्य देहावसानात् परं तत्पुत्रः श्रीरामशिरोमणिः त्रीन् एव छात्रान् स्वीकृत्य अध्यापनम् आरब्धवान्। ततः शीघ्रमेव तस्य पाण्डित्यं दिक्षु प्रसारितम्। श्रीरामशिरोमणेः ज्येष्ठपुत्रः आसीत् हरमोहन-तर्कचूडामणिः। सः माधवचन्द्र-तर्कसिद्धान्तस्य मृत्योः परं नवद्वीपे प्रधाननैयायिकपदम् अलङ्कृतवान्। ततः षोडशवर्षेभ्यः परं तस्य मरणानन्तरं तस्य भ्राता भुवनमोहन-विद्यारत्नः स्वप्रतिभया तत्पदमलङ्कृतवान्।

३)रामदेव-तर्कवागीशः- गदाधरस्य तृतीयपुत्रस्यास्य षट् पुत्राः आसन्। तेषु ज्येष्ठपुत्रः आसीत् हरिदेवः। तस्य च ज्येष्ठपुत्रः रामरामः सार्वभौमः पण्डितः आसीत्।

४)महादेवः- अयं गदाधरस्य चतुर्थः पुत्रः। अस्मिन् वंशे तस्य पौत्रः रामानन्द-तर्कपञ्चाननः पण्डितः आसीत्।

५)रघुदेव-न्यायवागीशः- गदाधरस्य कनिष्ठः पुत्रः आसीत् अयं रघुदेवः। तस्य पुत्रः हरिनारायण-वाचस्पतिः। तस्य च पुत्रः आसीत् गोपाल-सार्वभौमः। तत्पुत्रौ कृष्णजीवन-न्यायालङ्कारः, कृष्णचन्द्र-तर्कपञ्चाननः च। एते सर्वे एव नवद्वीपे सुख्याताः पण्डिताः आसन्। एतेषु गोपालः राज्ञः कृष्णचन्द्रस्य दानभाजनः आसीत्। तस्यैव पुत्रः कृष्णकान्त-तर्कवागीशः आसीत् अस्याः वंशधारायाः अन्तिमः पण्डितः।

❊❊❊